# Brahmadibhih Kritam Hari Stotram

# ब्रह्मादिभिः कृतं हरिस्तोत्रम्

## Document Information

Text title : Brahmadibhih Kritam Hari Stotram

File name : brahmAdibhiHkRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 94/43-49||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# ब्रह्मादिभिः कृतं हरिस्तोत्रम्

तावद्ब्रह्मादयस्तत्राऽऽययुस्तुष्टुवुरीश्वरम् ।
“अलं चाऽलं हरे शान्तिं गृहाण परमेश्वर ॥ ४३॥

असाध्यं ते न वै किञ्चिच्छ्रीपतेः परमात्मनः ।
वरुणो दग्धतां यातो जलं नष्टं प्रजायते ॥ ४४॥

जलहीनं जगत्सर्वं नाशं क्षणात्प्रयास्यति ।
प्रसीद त्वं कृपासिन्धो निवारयाऽस्त्रमुल्बणम् ॥ ४५॥

उज्जीवय च वरुणं जलहेतुं सुरं प्रभो ।
नमस्ते रुद्ररूपाय सङ्कर्षणाय ते नमः ॥ ४६॥

महाकालस्वरूपाय मृत्युरूपाय ते नमः ।
सर्वसंहारकृत्कृष्ण साधुरूपाय ते नमः ॥ ४७॥

क्षत्रान्तकाय देवानां हिताय च नमो नमः ।
सतां हिताय रामाय श्रीहरये ते नमो नमः” ॥ ४८॥

इतिस्तुतो हरिस्तत्र वीक्ष्य देवान् पुरःस्थितान् ।
शान्तिमासाद्य वह्न्यस्त्रं निजग्राह निवृत्तये ॥ ४९॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे ९४-अध्यायान्तर्गतं ब्रह्मादिभिः कृतं हरिस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय ९४/४३-४९॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 94/43-49..

Proofread by PSA Easwaran

*Brahmadibhih Kritam Hari Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*